## ५२. कुल्यपाकस्थऋषभदेवस्तुतिः ।

श्री**कुल्यपाक**[2]प्रासादाभरणं शरणं सताम् ।
**माणिक्यदेव**नामानमानमामि जिनर्षभम् ॥ १ ॥

### श्रीमाणिक्यदेवनमस्कारः ।

श्री**कुल्यपाकपुर**लक्ष्मीशिरोऽवतंस-प्रासादमध्यमनिमेध्यमधिष्ठितस्य ।
**माणिक्यदेव** इति यः प्रथितः पृथिव्याम्, तस्यांह्रियुग्ममभिनौमि जिनर्षभस्य ॥ १ ॥
तीर्थेशिनां समुदयो मुदितेन्द्रचन्द्र-कोटीरकोटितटघृष्टपदासनानाम् ।
मद्दुःखदारुणदुरुत्खनशाखिलेखा-पेषाय मत्तकरिणः करिणं दधातु ॥ २ ॥
हेतूपपत्तिसुनिरूपितवस्तुतत्त्वम्, स्याद्वादपद्धतिनिवेशितदुर्नयौघम् ।
सत्सिद्धवल्लिविपिनं भुवनैकपूजा-पात्रं जिनेन्द्रवचनं शरणं प्रपद्ये ॥ ३ ॥
आरुह्य खे चरति खेचरचक्रिणं या, **नाभेय**शासनरसालवनान्यपुष्टा ।
**चक्रेश्वरी** रुचिरचक्रविरोचिहस्ता, शस्ताय साऽस्तु नवविद्रुमकायकान्तिः ॥ ४ ॥

**॥ इति श्रीमाणिक्यदेवऋषभस्तुतयः ॥**

---

1 B सिरिह्रिअं । 2 Pa कुल्यपाद° ।

वि० क० १३